# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

## अध्याय ३४

अर्जुनेन विमुक्तस्तु रावणो राक्षसाधिपः ।
चचार पृथिवीं सर्वामनिर्विण्णस्तथा कृतः ॥ १॥

राक्षसं वा मनुष्यं वा शृणुते यं बलाधिकम् ।
रावणस्तं समासाद्य युद्धे ह्वयति दर्पितः ॥ २॥

ततः कदा चित्किष्किन्धां नगरीं वालिपालिताम् ।
गत्वाह्वयति युद्धाय वालिनं हेममालिनम् ॥ ३॥

ततस्तं वानरामात्यस्तारस्तारापिता प्रभुः ।
उवाच रावणं वाक्यं युद्धप्रेप्सुमुपागतम् ॥ ४॥

राक्षसेन्द्र गतो वाली यस्ते प्रतिबलो भवेत् ।
नान्यः प्रमुखतः स्थातुं तव शक्तः प्लवङ्गमः ॥ ५॥

चतुर्भ्योऽपि समुद्रेभ्यः सन्ध्यामन्वास्य रावण ।
इमं मुहूर्तमायाति वाली तिष्ठ मुहूर्तकम् ॥ ६॥

एतानस्थिचयान्पश्य य एते शङ्खपाण्डुराः ।
युद्धार्थिनामिमे राजन्वानराधिपतेजसा ॥ ७॥

यद्वामृतरसः पीतस्त्वया रावणराक्षस ।
तथा वालिनमासाद्य तदन्तं तव जीवितम् ॥ ८॥

अथ वा त्वरसे मर्तुं गच्छ दक्षिणसागरम् ।
वालिनं द्रक्ष्यसे तत्र भूमिष्ठमिव भास्करम् ॥ ९॥

स तु तारं विनिर्भर्त्स्य रावणो राक्षसेश्वरः ।
पुष्पकं तत्समारुह्य प्रययौ दक्षिणार्णवम् ॥ १०॥

तत्र हेमगिरिप्रख्यं तरुणार्कनिभाननम् ।
रावणो वालिनं दृष्ट्वा सन्ध्योपासनतत्परम् ॥ ११॥

पुष्पकादवरुह्याथ रावणोऽञ्जनसंनिभः ।
ग्रहीतुं वालिनं तूर्णं निःशब्दपदमाद्रवत् ॥ १२॥

यदृच्छयोन्मीलयता वालिनापि स रावणः ।
पापाभिप्रायवान्दृष्टश्चकार न च सम्भ्रमम् ॥ १३॥

शशमालक्ष्य सिंहो वा पन्नगं गरुडो यथा ।
न चिन्तयति तं वाली रावणं पापनिश्चयम् ॥ १४॥

जिघृक्षमाणमद्यैनं रावणं पापबुद्धिनम् ।
कक्षावलम्बिनं कृत्वा गमिष्यामि महार्णवान् ॥ १५॥

द्रक्ष्यन्त्यरिं ममाङ्कस्थं स्रंसितोरुकराम्बरम् ।
लम्बमानं दशग्रीवं गरुडस्येव पन्नगम् ॥ १६॥

इत्येवं मतिमास्थाय वाली कर्णमुपाश्रितः ।
जपन्वै नैगमान्मन्त्रांस्तस्थौ पर्वतराड् इव ॥ १७॥

तावन्योन्यं जिघृक्षन्तौ हरिराक्षसपार्थिवौ ।
प्रयत्नवन्तौ तत्कर्म ईहतुर्बलदर्पितौ ॥ १८॥

हस्तग्राह्यं तु तं मत्वा पादशब्देन रावणम् ।
पराङ्मुखोऽपि जग्राह वाली सर्पमिवाण्डजः ॥ १९॥

ग्रहीतुकामं तं गृह्य रक्षसामीश्वरं हरिः ।
खमुत्पपात वेगेन कृत्वा कक्षावलम्बिनम् ॥ २०॥

स तं पीड्दयमानस्तु वितुदन्तं नखैर्मुहुः ।
जहार रावणं वाली पवनस्तोयदं यथा ॥ २१॥

अथ ते राक्षसामात्या ह्रियमाणे दशानने ।
मुमोक्षयिषवो घोरा रवमाणा ह्यभिद्रवन् ॥ २२॥

अन्वीयमानस्तैर्वाली भ्राजतेऽम्बरमध्यगः ।
अन्वीयमानो मेघौघैरम्बरस्थ इवांशुमान् ॥ २३॥

तेऽशक्नुवन्तः सम्प्राप्तं वालिनं राक्षसोत्तमाः ।
तस्य बाहूरुवेगेन परिश्रान्ताः पतन्ति च ॥ २४॥

वालिमार्गादपाक्रामन्पर्वतेन्द्रा हि गच्छतः ॥ २५॥

अपक्षिगणसम्पातो वानरेन्द्रो महाजवः ।

क्रमशः सागरान्सर्वान्सन्ध्याकालमवन्दत ॥ २६ ॥

सभाज्यमानो भूतैस्तु खेचरैः खेचरो हरिः ।
पश्चिमं सागरं वाली आजगाम सरावणः ॥ २७ ॥

तत्र सन्ध्यामुपासित्वा स्नात्वा जप्त्वा च वानरः ।
उत्तरं सागरं प्रायाद्वहमानो दशाननम् ॥ २८ ॥

उत्तरे सागरे सन्ध्यामुपासित्वा दशाननम् ।
वहमानोऽगमद्वाली पूर्वमम्बुमहानिधिम् ॥ २९ ॥

तत्रापि सन्ध्यामन्वास्य वासविः स हरीश्वरः ।
किष्किन्धाभिमुखो गृह्य रावणं पुनरागमत् ॥ ३० ॥

चतुर्ष्वपि समुद्रेषु सन्ध्यामन्वास्य वानरः ।
रावणोद्वहनश्रान्तः किष्किन्धोपवनेऽपतत् ॥ ३१ ॥

रावणं तु मुमोचाथ स्वकक्षात्कपिसत्तमः ।
कुतस्त्वमिति चोवाच प्रहसन्रावणं प्रति ॥ ३२ ॥

विस्मयं तु महद्गत्वा श्रमलोकनिरीक्षणः ।
राक्षसेशो हरीशं तमिदं वचनमब्रवीत् ॥ ३३ ॥

वानरेन्द्र महेन्द्राभ राक्षसेन्द्रोऽस्मि रावणः ।
युद्धेप्सुरहं सम्प्राप्तः स चाद्यासादितस्त्वया ॥ ३४ ॥

अहो बलमहो वीर्यमहो गम्भीरता च ते ।
येनाहं पशुवद्गृह्य भ्रामितश्चतुरोऽर्णवान् ॥ ३५ ॥

एवमश्रान्तवद्वीर शीघ्रमेव च वानर ।
मां चैवोद्वहमानस्तु कोऽन्यो वीरः क्रमिष्यति ॥ ३६ ॥

त्रयाणामेव भूतानां गतिरेषा प्लवङ्गम ।
मनोऽनिलसुपर्णानां तव वा नात्र संशयः ॥ ३७ ॥

सोऽहं दृष्टबलस्तुभ्यमिच्छामि हरिपुङ्गव ।
त्वया सह चिरं सख्यं सुस्निग्धं पावकाग्रतः ॥ ३८ ॥

दाराः पुत्राः पुरं राष्ट्रं भोगाच्छादनभोजनम् ।
सर्वमेवाविभक्तं नौ भविष्यति हरीश्वर ॥ ३९ ॥

ततः प्रज्वालयित्वाग्निं तावुभौ हरिराक्षसौ ।
भ्रातृत्वमुपसम्पन्नौ परिष्वज्य परस्परम् ॥ ४० ॥

अन्योन्यं लम्बितकरौ ततस्तौ हरिराक्षसौ ।
किष्किन्धां विशतुर्हृष्टौ सिंहौ गिरिगुहाम् इव ॥ ४१ ॥

स तत्र मासमुषितः सुग्रीव इव रावणः ।
अमात्यैरागतैर्नीचस्त्रैलोक्योत्सादनार्थिभिः ॥ ४२ ॥

एवमेतत्पुरावृत्तं वालिना रावणः प्रभो ।
धर्षितश्च कृतश्चापि भ्राता पावकसंनिधौ ॥ ४३ ॥

बलमप्रतिमं राम वालिनोऽभवदुत्तमम् ।
सोऽपि तया विनिर्दग्धः शलभो वह्निना यथा ॥ ४४ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com